श्री नृसिंहकवच



खेमराज श्रीकृष्णदास प्रकाशन बम्बई

॥ श्रीनृसिंहकवचम् ॥

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.

संस्करण : जुलाई २०११, संवत् २०६८

मूल्य : ५ रुपये मात्र।

॥ श्रीनृसिंहकवचम् ॥

॥ श्रीमते रामानुजाय नमः॥

नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा।
सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनम्॥१॥
सर्वसंपत्करं चैव स्वर्गमोक्षप्रदायकम्।
ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितम्॥२॥
विवृतास्यं त्रिनयनं शरदिन्दुसमप्रभम्।
लक्ष्म्यालिङ्गितवामाङ्गं विभूतिभिरुपाश्रितम्॥३॥

चतुर्भुजं कोमलाङ्गं स्वर्णकुण्डलशोभितम्।
उरोजशोभितोरस्कं रत्नकेयूरमुद्रितम्॥४॥
तप्तकाञ्चनसंकाशं पीतनिर्मलवाससम्।
इन्द्रादिसुरमालिस्थस्फुरन्माणिक्यदीप्तिभिः॥५॥
विराजितपदद्वन्द्वं शङ्खचक्रादिहेतिभिः।
गरुत्मताच विनयात्स्तूयमानं मुदान्वितम्॥६॥
सहृत्कमलसंवासं कृत्वा तु कवचम्पठेत्।
नृसिंहो मे शिरः पातु लोकरक्षात्मसम्भवः॥७॥
सर्वगोपिस्तम्भवासः भालम्मे रक्षतु ध्वनिम्।
नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः॥८॥

स्मृतिम्मे पातु नृहरिर्मुनिवर्यस्तुतिप्रियः ।
नासाम्मे सिंहनासस्तु मुखं लक्ष्मीमुखप्रियः ॥९॥
सर्वविद्याधिपः पातु नृसिंहो रसनां मम ।
वक्त्रम्पात्विन्दुवदनः सदा प्रह्लादवन्दितः ॥१०॥
नृसिंहः पातु मे कण्ठं स्कन्धौ भूभरणांतकृत् ।
दिव्यास्त्रशोभितभुजो नृसिंहः पातु मे भुजौ ॥११॥
करौ मे देववरदो नृसिंहः पातु सर्वतः ।
हृदयं योगिसाध्यश्च निवासं पातु मे हरिः ॥१२॥
मध्यं पातु हिरण्याक्ष वक्षःकुक्षि विदारणः ।
नाभिं मे पातु नृहरिः स्वनाभिब्रह्मसंस्तुतः ॥१३॥

ब्रह्माण्डकोटय: कट्यां यस्यासौ पातु मे कटिम्।
गुह्यं मे पातु गुह्यानां मंत्राणां गुह्यरूपधृक्॥१४॥
ऊरू मनोभवः पातु जानुनी नररूपधृक्।
जङ्घे पातु धराभारहर्ता योऽसौ नृकेसरी॥१५॥
सुरराज्यप्रदः पातु पादौ मे नृहरीश्वरः।
सहस्रशीर्षपुरुषः पातु मे सर्वशस्तनुम्॥१६॥
महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः।
महाविष्णुर्दक्षिणे तु महाज्वालस्तुनिर्ऋतौ॥१७॥
पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुखः।
नृसिंहः पातु वायव्यां सौम्यां भीषणविग्रहः॥१८॥

ईशान्यां पातु भद्रो मे सर्वमङ्गलदायकः।
संसारभयदः पातु मृत्योर्मृत्युर्नृकेसरी ॥१९॥
इदं नृसिंहकवचं प्रह्लादमुखमण्डितम्।
भक्तिमान्यः पठेन्नित्यं सर्वपापैः प्रमुच्यते ॥२०॥
पुत्रवान्धनवाल्लोक दीर्घायुरुपजायते।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम् ॥२१॥
सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत्।
भूम्यन्तरिक्षदिव्यानां ग्रहाणां विनिवारणम् ॥२२॥
वृश्चिकोरगसम्भूतं विषापहरणं परम्।
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणम् ॥२३॥

भूर्जवार्तोलपत्रे वा कवचं लिखितं शुभम्।
करमूले धृतं येन सिद्ध्येयुः कर्मसिद्धयः ॥२४॥
देवासुरमनुष्येषु स्वंस्वमेव जयं लभेत्।
एकसन्ध्यं त्रिसन्ध्यं वा यः पठेन्नियतो नरः ॥२५॥
सर्वमंगलमाङ्गल्यं भुक्तिं मुक्तिं च विन्दति।
द्वात्रिंशतिसहस्राणि पठेच्छुद्धात्मनां नृणाम् ॥२६॥
कवचस्यास्य मन्त्रस्य मन्त्रसिद्धिःप्रजायते।
अनेन मन्त्रराजेन कृत्वा भस्माभिमन्त्रणम् ॥२७॥
तिलकं विन्यसेद्यस्तु तस्य ग्रहभयं हरेत्।
त्रिवारं जपमानस्तुदत्तंवार्यभिमन्त्र्य च ॥२८॥

प्राशयेद्यं नरं मन्त्रं नृसिंहध्यानमाचरेत्।
तस्य रोगाः प्रणश्यन्ति ये च स्युः कुक्षिसंभवाः ॥२९॥
किमत्रं बहुनोक्तेन नृसिंहसदृशो भवेत्।
मनसा चिन्तितं यत्तु स तच्चाप्नोत्यसंशयम् ॥३०॥
गर्जन्तङ्गर्जयंतं निजभुजपटलं स्फोटयन्तं हरन्तं
रूप्यन्तं तापयन्तं दिविभुविक्षितिजं क्षेपयन्तं शिरन्तम्।
क्रन्दन्तं रोषयन्तं दिशि दिशि सततं सम्भरन्तं हरन्तं
वीक्षंतं घर्णयन्तं करनिकरशतैर्दिव्यसिंहं नमामि ॥३१॥

॥ इति नृसिंहकवचं समाप्तम् ॥

॥ श्रीनृसिंहप्रसादोस्तु ॥

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS